CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 361.

Title Apāmārjana Stotra

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 361	Subject: Stotra.
Title: Viṣṇor-apāmārgaṇa stotra.	
Author: —	Scribe: A. S. Dave.
Date of the work: —	Date of the Ms.: V.S. 1955
Place of the work: —	Place of the Ms.: —
Size: 6 3" by 5."	Extent: 10 foll.
Language: Sanskrit.	Script: Devanāgarī
Remarks:	

१ अथातः संप्रवक्ष्यामि अपामार्जनमुत्तमं पुलस्त्येन यथाप्रोक्तं दाल्भ्य
स्य च महात्मनः ॥१॥ सर्वेषां रोगदोषाणां नाशनं मंगलप्रदं । विष्णुधर्मेषु दाल्भ्यो

॥श्रीगणेशाय नमः॥ ॥दाल्भ्य उवाच॥ भगवन्प्राणिनः सर्वे विषरोगाद्युप
द्रवैः । दुष्टग्रहोपघातैश्च सर्वकालमुपद्रुताः ॥१॥ आभिचारिककृत्याभिस्स्प
र्शरोगैश्च दारुणैः । सदा संपीड्यमानास्तु तिष्ठंति मुनिसत्तम ॥२॥ येन क
र्मविपाकेन ग्रहरोगाद्युपद्रवाः । न भवंति नृणां तन्मे यथावद्वक्तुमर्हसि
॥३॥ पुलस्त्य उवाच ॥ व्रतोपवासैर्यैर्विष्णुर्नान्यजन्मनि तोषितः । ते नरा
मुनिशार्दूल ग्रहरोगादिभागिनः ॥४॥ यैर्न तत्प्रवणं चित्तं सर्वदैव न
रैः कृतं । विषग्रहज्वराणां ते मनुष्या दाल्भ्य भागिनः ॥५॥ आरोग्यं परमा
मृद्धिं मनसा यद्यदिच्छति । तत्तदाप्नोत्यसंदिग्धं परत्राप्यच्युततोषकृत्
॥६॥ नाधीन्प्राप्नोति न व्याधीन्न विषग्रहबंधनं । कृत्यास्पर्शभयं
वापि तोषिते मधुसूदने ॥७॥ सर्वदुष्टप्रशमनास्तस्य सौम्यास्तस्य सदा
ग्रहाः । देवानामप्यधृष्योऽसौ तुष्टो यस्य जनार्दनः ॥८॥ तोषिते तव १
यथो वायुपुराने ॥२॥ [illegible] ॥ नित्योदितं
परमानंदनस्मै सच्चिदलेनमः ॥३॥ ॐ १२ | १ यः समः सर्वभूतेषु यथात्मनि तथा परे ॥
[illegible]

ष्टुगीयते ॥ तेन सत्येन ॥४४॥ यथा योगेश्वरो विष्णुर्वेदांतेष्वपि गीयते ॥ तेन सत्येन ॥४५॥
नां तिरस्कृत्य सर्वे चास्त्रशस्त्रमयं च यत् ॥ वासुदेवशरीरोत्थैः कृत्यौघैः संमार्जि
तो मया ॥४६॥ अपामार्जितगोविंदो नरो नारायणस्तथा । तथास्तु सर्वदुष्टा
नां प्रशमो वचनाद्धरेः ॥४७॥ शांताः समस्तरोगास्ते ग्रहाः सर्वविषाणि च ॥ भू
तानि च प्रशाम्यंतु संस्मृते मधुसूदने ॥४८॥ एतत्समस्तरोगेषु भूतग्रहभयेषु
च ॥ अपामार्जनकं शस्तं विष्णोर्नामाभिमंत्रितं ॥४९॥ सर्वबाधापनुत्यर्थं पुलस्त्या
त्तिहितं पुरा ॥ अपामार्जनकं स्तोत्रं सर्वरोगविनाशनं ॥५०॥ यथा च कौस्तुभं
विष्णोर्यथा शंखं हरस्य च ॥ यथा वज्रं सुरेंद्रस्य तथा प्रकरे कुशाः ॥५१॥ एतत्कृ वि
त्वा विष्णुशरीरसंभवा जनार्दनोयं स्वयमेव चागतः ॥ हतं मया दुःखमशेष
मस्य स्वस्थो भवत्वेष यथा हरेः ॥५२॥ नां तिरस्कृत्य सर्वे चास्त्रमस्य प्र
शाम्यतु ॥ यदस्य दुरितं किंचित्क्षिप्तं लवणांभसि ॥५३॥ स्वास्थ्यमस्तु शि १५

न

छिंधि भिंधि महाव्याधिं छिंधि भिंधि महाग्रहं॥३६॥ छिंधि भिंधि वातं च लूतां च छिंधि भिंधि घोरं महाविषं॥
रुजं दाहं च शूलं च सविषं ज्वालागर्दभं॥३७॥ ह्रां ह्रां हूं हूं फट्कारेणाद्यं येन हन विद्धि
ष॥ सुदर्शनस्य मंत्रेण ग्रहा यांतु दिशो दश॥३८॥ ॐ नमो भगवते तेजोसुदर्शन
दुष्टान्दारय दारय दुरितं हन हन पापं मथ मथ आरोग्यं कुरु कुरु ह्रां ह्रां हुं फट्
स्वाहा॥३९॥ त्रैलोक्यरक्षाकर्त्ताचि मांज्ञापय जनार्दन॥ सर्वदुष्टानि रक्षांसि क्ष
पयाशु विभीषण॥४०॥ प्राच्यां रक्ष प्रतीच्यां च दक्षिणोत्तरयोस्तथा॥ व्याघ्रसिं
हवराहेभ्यो वह्निचौरभयेषु च॥४१॥ रक्षां करोतु सर्वत्रासौ नरसिंहः स्वगर्जितैः
दिवि भुव्यंतरिक्षे च पार्श्वतः पृष्ठतोग्रतः॥४२॥ रक्षां करोतु भगवान् बहुरूपी ज
नार्दनः॥ शांतिरस्तु शिवं चास्तु दुष्टमस्य प्रशाम्यतु॥४३॥ यथा विष्णुर्जगत्स
र्वं सदेवासुरमानुषं॥ तेन सत्येन सकलं दुष्टमस्य प्रशाम्यतु॥४४॥ यथा विष्णौ
स्मृते सद्यः संक्षयं यांति पातकं॥ तेन सत्येन॥४५॥ यथा यज्ञेश्वरो विष्णुः सर्ववेदे

॥ हृदि कारव्यान्ग्रहांश्चैव तथा मातृग्रहानपि॥२४॥ बालस्य विष्णोश्चरितं हंतु बाल
ग्रहानिमान्॥ वृद्धानां च ग्रहाः केचिद्ये च बालग्रहाः क्वचित्॥२५॥ नरसिंहस्य
ते दृष्ट्या दग्धा ये चापि यौवने॥ सटाकरालवदनो नरसिंहो महारवः॥२६॥ ग्र
हानशेषान्निःशेषान्करोतु जगतो हितः॥ नरसिंह महासिंह ज्वालामालोज्ज्व
लानन॥२७॥ ग्रहानशेषान्सर्वेश खाद खादाग्निलोचन॥ ये रोगा ये महोत्पा
ता यद्विषं ये महाग्रहाः॥२८॥ यानि च क्रूरभूतानि ग्रहपीडाश्च दारुणाः॥ श
स्त्रक्षतेषु ये रोगा ज्वालागर्दभकादयः॥२९॥ यानि चान्यानि दुष्टानि प्राणिपीड
[illegible] कराणि च॥ तानि सर्वाणि सर्वात्मन् परमात्मन् जनार्दन॥३०॥
किंचिद्रूपं समास्थाय वासुदेवास्य नाशय॥ क्षिप्त्वा सुदर्शनं चक्रं ज्वालामालाति
भीषणं॥३१॥ सर्वदुष्टप्रशमनं कुरु देववराच्युत॥ सुदर्शन महाचक्र गोविंद
स्य करायुध॥३२॥ ज्वलत्पावकसंकाश सूर्यकोटिसमप्रभ॥ त्रैलोक्यरक्षाक
र्त्ता च दुष्टदानवदारण॥३३॥ तीक्ष्णधार [illegible] महावेग छिंधि भिंधि महाज्वरं॥ छिंधि ८

ति दारुणान्॥ गलगंडरतिसाराश्च मुखरोगांश्च वल्गुलीन्॥१६॥ अश्मरीमूत्रकृच्छ्रां
श्च रोगानन्यांश्च दारुणान्॥ ये वातप्रभवा रोगा ये च पित्तसमुद्भवाः॥१७॥ कफोद्भ
वाश्च ये रोगा ये चान्ये सान्निपातिकाः॥ आगंतुकाश्च ये रोगा लूताविस्फोटकादयः॥
१८॥ ते सर्वे प्रशमं यांतु वासुदेवापमार्जिताः॥ विलयं यांतु ते सर्वे विष्णोरुच्चारणेन
तु॥१९॥ क्षयं गच्छंतु नोषास्ते चक्रेणाभिहता हरेः॥ अच्युतानंतगोविंदनामोच्चा
रणभेषजात्॥ नश्यंति सकला रोगाः सत्यं सत्यं वदाम्यहं॥२०॥ अच्युतेति मनःपू
तः मनंतेति वचः पुनः॥ गोविंदेति च नाम्नेन ज्ञाताज्ञातेषु पातकेः॥२१॥ अच्युता
नंतगोविंदपादस्मानुष्टुब्छंदसे॥ ॐ नमः संपुटीलु ब्राह्मपान्निषमधाच्छिवः॥२२॥
स्थावरं जंगमं चापि कृत्रिमं चापि यद्विषं॥ तद्देतोद्भूतनखोद्भूतमाकाशप्रभ
वं विषं॥२३॥ लूतादिप्रभवं यच्च विषमत्यंतदुःखदं॥ नाम नयतु गोविंदः कीर्ति
तो यज्जनार्दनः॥२४॥ ग्रहान्प्रेतग्रहांश्चैव गंधर्वान्यक्षराक्षसान्॥ शाकिनीपू
तनाद्यांश्च तथा वेडाकिनीग्रहान्॥ मुखमंडलिकान्क्रूरान्रेवतीवृद्धरेवती॥

निनादेन कुष्माण्डास्याश्च विनाशनान्॥ ५॥ ऋग्यजुःसामगत्तात्विवाग्निर्वामनरूप
धृक्॥ सुनाम सर्वदुःखानि नयत्वाशु जनार्दनः॥६॥ ॐ अस्य ज्वरमंत्रस्य कालाग्नि
ऋषिः त्रिष्टुप् छंदः॥ प्रद्युम्नसंकर्षणवासुदेवा देवताः॥ सकलज्वरनाशार्थे
विनियोगः॥ नाद्यंतवंतः कवयः पुराणाः सूक्ष्मा बृहंतोऽप्यनुशासितारः॥ स
र्वज्वरान्घ्नंतु ममानिरुद्ध प्रद्युम्नसंकर्षणवासुदेवाः॥७॥ त्रिपादस्मप्रहर
णास्त्रिशिरारक्तलोचनः॥ स मे प्रीतः सुखं दद्यात्सर्वभयपतिर्ज्वरः॥८॥ भ
स्मायुधाय विघ्नहे एकदंष्ट्राय धीमहि॥ तन्नो ज्वरः प्रचोदयात्॥९॥ ऐकाहि
कं द्व्याहिकं च तथा त्रिदिवसं ज्वरं॥ चातुर्थिकं तथात्युग्रं तथैव सततं ज्वरं॥
१०॥ दोषोत्थं सन्निपातोत्थं तथैवागंतुकज्वरं॥ नाम नयतु गोविंदश्छिंधिछिंधि
स्य वेदनां॥११॥ नेत्रदुःखं शिरोदुःखं दुःखमुदरसंभवं॥ अतिकासमतिश्वासं
परितापं चवेपथुं॥१२॥ गुदघ्राणांघ्रिरोगांश्च कुष्ठरोगं तथा क्षयं॥ चित्रादिनि
खजान्रोगान्सर्वगस्य तत्वहिर्गतान्॥१३॥ कामलादींस्तथा रोगान्प्रमेहांश्च ७

तायच॥ नमस्तु॥९४॥ वाराहेन्नारसिंहेन वामनेन त्रिविक्रम॥ हयग्रीवेन सर्वे
न हृषीकेन हरास्तु ते॥९५॥ अपराजितचक्राद्यैश्चतुर्भिः परमायुधैः॥ अखंडि
तानुभावैस्त्वं सर्वदुःखहरो भव॥९६॥ हरामुकस्य दुरितं दुष्कृतं दुरुपोषितं मृत्यु
बंधार्तिभयं दुरिष्टस्य च यत्फलं॥९७॥ पराभिध्यानसहितं प्रयुक्तं चाभिचारि
कं॥ गरस्पर्शमहारोगप्रयोगं जरया जर॥९८॥ हरये वासुदेवाय नमः शंखाय शा
र्ङ्गिणे॥ नमः पुष्करनेत्राय केशवायादिचक्रिणे॥९९॥ महाहवरिपुस्कंधघृष्ट
चक्राय चक्रिणे॥ दंष्ट्रोद्धृतक्षितिभृते त्रिमूर्तिपतये नमः॥१००॥ महायज्ञवरा
हाय शेषभोगोरुशायिने॥ नमः कपिलकिंजल्कपीतनिर्मलवाससे॥१॥
तप्तहाटककेशांतज्वलत्पावकलोचन॥ वज्राधिकनखस्पर्श दिव्यसिंह न
मोस्तु ते॥२॥ काश्यपायातिह्रस्वाय ऋग्यजुःसामरूपिणे॥ तुभ्यं वामनरूपा
य क्रमते गां नमो नमः॥३॥ वराहाशेषदुष्टानि सर्वपापफलानि वै। मर्द मर्द म
हादंष्ट्र मर्द मर्द महीधर॥४॥ नरसिंह करालास्य दंतप्रांतनखोज्ज्वल॥ भंज भंज

रुद्दिरितस्तुयहोरात्र श्रीविष्णोः प्रीत्यर्थे विनियोगः॥ ॐ नमः परमार्थाय पुरुषा
य महात्मने॥ नमस्ते न्यापवस्यामि यत्सिध्यति मे वचः॥८१॥ अरूपबहुरूपा
य व्यापिने परमात्मने॥ नमस्तु॥८२॥ निःकल्मषाय शुद्धाय ध्याटपापहरा
य च॥ नमस्तु॥८३॥ नारायणाय विश्वाय अनंताय महात्मने॥ नमस्तु॥८४॥
गोविंदपद्मनाभाय वासुदेवाय चूनते॥ नमस्तु॥८५॥ सच्चिदानंदरूपाय
योगिने परमात्मने॥ नमस्तु॥८६॥ दामोदराय देवाय अनंताय महात्मने॥ नम
स्तु॥८७॥ वाराहाय नृसिंहाय वामनाय महात्मने॥ नमस्तु॥८८॥ त्रिविक्र
माय रामाय वैकुंठाय नराय च॥ नमस्तु॥८९॥ अधोक्षजाय तार्क्ष्याय मनस्याय
मधुसूदने॥ नमस्तु॥९०॥ विश्वरश्रवसे तुभ्यं हारीणो निधिशायिने॥ नमस्तु
॥९१॥ प्रद्युम्नायानिरुद्धाय पुरुषोत्तम केशवा॥ नमस्तु॥९२॥ जनार्दनाय कृ
ष्णाय उपेंद्र श्रीधराय च॥ नमस्तु॥९३॥ हृषीकेशाय शंखाय माधवायाच्यु ६

ष्ठे न्यस्य चक्रं विन्यस्य पृष्ठतः ॥ श्रीवत्सकं न्यसेन्मूर्द्ध्नि पेचांगकवचीं न्यसेत्
॥ ७६ ॥ ॐ नमो भगवते केशवाय सर्वक्लेशापहन्त्रे हृदयाय नमः ॥ ॐ नमो॰
त्रे शिरसे स्वाहा ॥ ॐ नमो॰ त्रे शिखायै वौषट् ॥ ॐ नमो॰ त्रे कवचाय हुं ॥ ॐ नमो॰
त्रे भूर्भुवः स्वः अस्त्राय फट् ॥ विष्णुरूर्ध्वमधः पातु वैकुंठस्तु विदिग्दिशि ॥ पातु मां
सर्वतो रामो धन्वी चक्री च केशवः ॥ ७७ ॥ एवं न्यासं पुरं कृत्वा पश्चान्मंत्रं प्रयो
जयेत् ॥ अपामार्जनको न्यासः सर्वव्याधिविनाशनः ॥ ७८ ॥ आत्मनश्च परस्या
पि विधिरेष उदाहृतः ॥ वैष्णवेन तु कर्तव्यः सर्वसिद्धिप्रदायकः ॥ ७९ ॥ यद्य
द्भुतरं लोके तत्सर्वं प्राप्नुयान्नरः ॥ अंते यं सर्वभूतेभ्यो विष्णुलोकं स गच्छति
॥ ८० ॥ अस्यापामार्जनस्तोत्रस्य पुलस्त्य ऋषिः ॥ वाराहो वामनो नृसिंहो वि
ष्णुर्देवता ॥ अनुष्टुप् छंदः ॥ हरामुकस्येति बीजं ॥ अच्युतानंत गोविंदेति श
क्तिः ॥ तप्तहाटककेशांतेति कीलकं ॥ वज्राधिकनखस्पर्शेति वेधकं ॥ अपा

र्ध्वयोः पुष्कराक्षं च सर्वतो विश्वरूपिणं ॥ दंष्ट्री पीतांबरं सर्वतनौ हरिं नाभौ तु
विन्यसेत् ॥ करे च दक्षिणे विप्र ततः संकर्षणं न्यसेत् ॥ ८७ ॥ वामे रिपुहरं विद्या
त्कटिमध्ये पराजितं ॥ पृष्ठे क्षितिधरं विद्यादच्युतं स्कंधयोर्द्वयोः ॥ ८८ ॥ वाम
कटौ माधवं तु दक्षिणे जलशायिनं ॥ स्वयं तु वामे च मध्ये ऊर्वोश्चैव गदाधरं ॥ ८९
चक्रायुधं जानुमध्ये जंघयोरच्युतं न्यसेत् ॥ गुल्फयोर्नारसिंहं च पादपृष्ठे त्रितोज
सं ॥ ९० ॥ अंगुलीषु श्रीधरं च पद्मनाभं सर्वसंधिषु ॥ नखेषु माधवं चैव न्यसेत्पाद
तलेऽच्युतं ॥ ९१ ॥ रोमकूपे गुडाकेशं सर्वे रक्तास्थिमज्जसु ॥ मनोबुद्ध्योर्ईरं कारचि
त्तेषु जनार्दनं ॥ ९२ ॥ आपादमस्तकं चैव केशवं कल्पयेद्बुधः ॥ एवं न्यासवि
धिं कृत्वा साक्षान्नारायणो भवेत् ॥ ९३ ॥ तथैव विष्णुमयी तस्य यावत्किंचिन्न
भाषते ॥ एवं न्यासं पुरं कृत्वा यत्कार्यं स्मृतं द्विज ॥ ९४ ॥ पादमूले तु देवस्य शंखं
विन्यस्य निर्मलं ॥ वनमालां हृदि न्यस्य सर्वदेवाभिपूजितां ॥ ९५ ॥ गदां वक्षे

उदित्यं ध्येयं विष्णुं सर्वत्रगं स्मरेत्॥ अव्यग्रचित्तः कुर्वीत न्यासकर्म यथाविधि॥ ५७॥
अंगुष्ठयोस्तु गोविंदं तर्जन्यां च महीधरं॥ मध्यमायां हृषीकेशं अनामिकायां त्रिवि
क्रमं॥ ५८॥ कनिष्ठायां न्यसेद्विष्णुं करमध्ये तु माधवं॥ एवं न्यासं पुरा कृत्वा पश्चाद्देहे
गेषु विन्यसेत्॥ ५९॥ शिखायां केशवं न्यस्य मूर्ध्नि नारायणं न्यसेत्॥ मालाधरं ल
लाटे तु गोविंदं तु भ्रुवोर्न्यसेत्॥ ६०॥ चक्षुर्युग्मे न्यसेद्विष्णुं श्रोत्रयोर्मधुसूदनं॥ त्रिवि
क्रमं कपोले तु वामनं कर्णमूलयोः॥ नासारंध्रद्वये चैव श्रीधरं कल्पयेद्बुधः॥ दा
मोदरं दंतपंक्तौ वाराहं चिबुके न्यसेत्॥ ओष्ठयोष्ठे हृषीकेशं पद्मनाभं तथाधरे
॥ ६२॥ जिह्वायां वासुदेवं च तालुके गरुडध्वजं॥ वैकुंठं कंठमध्ये तु अनंतं नासिका
पराः॥ ६३॥ दक्षिणे तु भुजे विद्वान् विन्यसेत्पुरुषोत्तमं॥ वामे तु भुजे मध्ये गं राघवं द्व
द्विविन्यसेत्॥ ६४॥ भुजांतरे च विश्वेशं ग्रीवायां माधवं न्यसेत्॥ वक्षःस्थले श्री
निवासं कंठे कामप्रदं न्यसेत्॥ ६५॥ जठरे देवदेवेशं स्तनयोः परमेश्वरं॥ पा

ब

हृस॥ ६९॥ कौस्तुभेनोद्भासितसर्वांगं वनमालाविभूषितं॥ रत्नसंकाशदशनं पद्म
पत्रायतेक्षणं॥ ७०॥ सूर्यकोटिप्रतीकाशं विष्णुं गरुडवाहनं॥ सुरेश्वरं चारु
हासं ध्यायेद्दत्तश्रिया युतं॥ ७१॥ विष्णुं भूषितचंद्रकोटिसमदंष्ट्रांकुरं वरथांगगदा
मंभोजं दधतं सिताब्जनिलयं कांत्या जगन्मोहनं॥ आबद्धांगदचारुकुंडलम
हामौलिस्फुरत्कंकणं श्रीवत्सांकमुदारकौस्तुभधरं ध्यायेन्मुनींद्रस्तुतं॥ ७२॥
इत्थं ध्यात्वा समभ्यर्च्य स्थित्वो वै नंदको कुशासने॥ मंत्रैरेतैर्यथालिंगं कुर्याद्दिग्बंधमा
हतः॥ ७३॥ पूर्वे नारायणः पातु वारिजाक्षस्तु दक्षिणे॥ प्रद्युम्नः पश्चिमे पातु वा
सुदेवस्तथोत्तरे॥ ७४॥ ईशान्यामवतु विष्णुराग्नेय्यां तु जनार्दनः॥ नैर्ऋत्यां प
द्मनाभस्तु वायव्यां मधुसूदनः॥ ७५॥ ऊर्ध्वं गोवर्द्धनो देवो धरायां चक्रविक्र
मः॥ तोयेभ्यो दशदिक्ष्वस्तु सर्वतः पातु केशवः॥ ७६॥ जले रक्षतु वाराहः स्थ
ले रक्षतु वामनः॥ अटव्यां नरसिंहस्तु सर्वतः पातु केशवः॥ ७७॥ एवं कृत्वा ४

कलशममृतपूर्णं वामहस्ते दधानं तरति सकलदुःखं वामनं भावयेद्यः ॥४१॥ अ
खर्वश्यामः शुचिर्यज्ञोपवीती सकौपीनः पीतसंध्याजिनश्रीः ॥ छत्री दंडी पुंडरीक
यताक्षः पायान्मायावामनो ब्रह्मचारी ॥४२॥ अजिनदंडकमंडलुमेखलारु
चिरपावनवामनमूर्त्तये मितजगत्त्रितयाय जितारये निगमवाक्पटवे बटवे नम
नः ॥४३॥ ध्यायेहं पुंडरीकाक्षं वामनं पीतवाससं ॥ श्रियः कांतं जगन्नाथं शंख
चक्रगदाधरं ॥४४॥ ह्रस्वांगं कौस्तुभोरस्कं पीतयज्ञोपवीतिनं ॥ मेखलामजि
नं दंडमक्षसूत्रं कमंडलुं ॥४५॥ धा[illegible]रयंतं चारुसं[illegible]होष्ठनासमुखपंकजं
वेदवेदांगशास्त्रेषु निपुणं ब्रह्मचारिणं ॥४६॥ मुक्तागैरनवमशिलसद्भूष
णं चंद्रसंस्थं शृंगाकारैरनेकनिकरैः शोभितं वक्त्रारविंदं ॥ हस्ताब्जाभ्यां कन
ककलशं शुद्धतोयाभिपूर्णं दध्यन्नाद्यं स्वकरचषकं धारयंतं भजामः ॥४७॥
श्रात्रीवक्त्रं चतुर्बाहुं शंखचक्रगदाधरं ॥ पीतांबरं घनश्यामं श्रीवत्सांकितव

नखांकितं ॥ जंघांतररणसंस्पर्द्धिकुंभालंकरणान्वितं ॥४८॥ चतुर्थी चंद्रसं
काशसुदंष्ट्रमुखपंकजं ॥ अतिरक्तोष्ठवदनं व्याघ्रास्यपरितोषणं ॥४९॥ ल
क्ष्म्यालिंगितवामांगं विभूतिभिरुपासितं ॥ गुरुलतौ सुविनयात्स्तूयमानं मु
दान्वितं ॥५०॥ माणिक्याद्रिसमप्रभं निजरुचा संत्रस्तरक्षोगणं जानुन्यस्तक
रांबुजं त्रिनयनं रत्नोल्लसद्भूषणं ॥ बाहुभ्यां धृतशंखचक्रमनिशं दंष्ट्रोग्रवक्त्रो
ल्लसज्ज्वालाजिह्वमुदग्रकेशनिचयं ध्यायेन्नृसिंहं हरिं ॥५१॥ सुतनुं सुकेशैरां
सुश्रोणीं सुतनुजां सुद्विजाननां ॥ सुप्रतिष्ठां सुदंतीं च चतुर्हस्तां विचिंतयेत् ॥५२
॥ उत्पलं चैव चार्वंगी हरिणी सर्वकामदा ॥ तप्तकांचनसंकाशां सर्वाभरण
भूषितां ॥५३॥ सुवर्णकलशप्रख्यपीनोन्नतपयोधरां ॥ गृहीतमातुलिंगाभ्यां
जांबूनदकरान्वितां ॥ एवं देवीं नृसिंहस्य वामांकोपरि संस्मरेत् ॥५४॥ अ
तिशुभ्रविमलगात्रं रुक्मपात्रस्थमन्नं सुदधिललितखंडं पाणिना दक्षिणेन ॥ २

रूपशोभितं॥ पीतांबरधरं देवं स्रक्‌माल्यानुलेपनं॥२६॥ त्रयस्त्रिंशत्कोटिदे
वैः स्तूयमानं दिवानिशं॥ ऋषिभिः सनकाद्यैश्च किंनरैरप्सरोगणैः॥२७॥ नृ
त्यद्भिरप्सरोवर्गैर्गीयमानं च किंनरैः॥ शंखचक्रखड्गखेटगदाशार्ङ्गधरं हरिं
॥२८॥ आपादं जानुदेशाद्वै कनकनिभं नाभिदेशाद्धस्तान्मुक्ताभं कंठदेशा
दरुणरविनिभं मस्तकान्नीलभासं॥ ध्यायेद्धस्तैर्दधानं रथचरणदरौ खड्ग
खेटौ गदाख्यां शार्ङ्गं हस्तानां त्रये च क्षितिधरणलसद्दंष्ट्रमाद्यं वराहं॥२९॥ सुव
र्णमंडपांतस्थं पद्मं ध्यायेत्सकेसरं॥ सकर्णिकदलैरिष्टैरष्टभिः परिशोभितं॥
३०॥ कलंकरहितं देवं पूर्णचांद्रंबुदप्रभं॥ तद्विसमानशोभाना तकंठनालेन
शोभितं॥३१॥ श्रीवत्सांकितवक्षस्कं तीक्ष्णदंष्ट्रं सुलोचनं॥ वनमालादिशो
भाढ्यं मुक्ताहारोपशोभितं॥३२॥ पंकजास्यं चतुर्हस्तं तत्सूख्यां तत्सुलोचनं॥
प्रातःसूर्यसमप्रख्यकुंडलाभ्यां विराजितं॥३३॥ जानुपरिन्यस्तकरं देवं दंरक्ष

वचा॥ पूजयेत्तत्र सकलैरुपचारैः समंत्रकैः॥१४॥ कुशमूले स्थितो ब्रह्मा
कुशमध्ये जनार्दनः॥ कुशाग्रे शंकरं विद्यात्त्रयो देवाः कुशे स्थिताः॥१५॥
गृहीत्वा तु समूलाग्रान्कुशान्स्नानपस्पृशेत्॥ मार्जयेत्सर्वगात्राणि
कुशाग्रे दक्षिणाग्रां तिष्ठत्॥१६॥ शरीरे यस्य तिष्ठंति कुशाग्र्यंजलबिंदवः॥
नश्यंति तस्य पापानि गरुडेनेव पन्नगाः॥१७॥ विष्णुभक्तो विशेषेण शुचि
स्तद्गतमानसः॥ रोगग्रहविषार्त्तानां कुर्याच्छांतिमिमां शुभां॥१८॥ वाराहं नरसिं
हं च वामनं विष्णुमेव च॥ ध्यात्वा समाहितो भूत्वा दिक्षु नामानि विन्यसेत्॥
॥१९॥ अथ ध्यानं प्रवक्ष्यामि सर्वपापप्रणाशनं॥ वाराहरूपिणं देवं सस्म
रन्नर्चयिन्‌जपेत्॥ ह्रूं॥ हुँ हलनं हुँ हहाकुं हुँ हुदंष्ट्रं सुशोभनं समस्तवेदवेदां
गयुक्तांगं गुणैर्युतं॥२०॥ उद्धृत्य भूमिं पातालाद्दंष्ट्राग्रमुपगृह्य च॥ आलिंग्य
भूमिं शिरसा भूमिं म्र जिघ्रुतम चक्रतं॥२१॥ रत्नवैडूर्यमुक्तादिभूषणैः २

मि

श्य २

जायंते नराः पूर्णमनोरथाः ॥ अरोगाः सुखिनो भोगभोक्तारो मुनि
सत्तम ॥ ९ ॥ न तेषां शत्रवो नैव स्पर्शरोगाभिचारिकं ॥ ग्रहरोगादिकं
वापि पापकार्यं न जायते ॥ १० ॥ अव्याहतानि कृष्णस्य चक्रादीन्यायुधा
नि तं ॥ रक्षंति सकलापद्भ्यो येन विष्णुरुपासितः ॥ ११ ॥ दाल्भ्य० अनारा
धितगोविंदा ये नरा दुःखभागिनः ॥ तेषां दुःखाभिभूतानां यत्कर्तव्यं
दयालुभिः ॥ १२ ॥ पश्यद्भिः सर्वभूतस्थं वासुदेवं महामुने ॥ समदृष्ट्या
हृषीकेशं तन्मम ब्रूह्यशेषतः ॥ १३ ॥ पुलस्त्य० ॥ नीलोत्पलदलश्यामं
पीतांबरधरं हरिं ॥ शंखचक्रगदापाणिं ध्यात्वापामार्जनं जपेत् ॥ १४
सौवर्णं राजतं ताम्रं मृन्मयं वा दृढं नवं ॥ अव्रणं कलशं शुद्धं स्थापये
त्तंडुलोपरि ॥ १५ ॥ तत्रोदकं समानीय शुद्धं निर्मलमेव च ॥ एकं शतं च
दर्भांश्च स्थापयेत्कलशोपरि ॥ १६ ॥ वाराहं नारसिंहं च वामनं विष्णुमे

वं चास्तु हृषीकेनामस्य कीर्तनात् ॥ यत एवागतं पापं तत्रैव प्रतिगच्छतु ॥ ५४ ॥ ए
तद्रोगादिपीडासु जंतूनां हितमिच्छता ॥ विष्णुभक्तेन कर्तव्यमपामार्जनकं परं ॥
५५ ॥ अनेन सर्वदुष्टानि प्रशमं यांत्यसंशयं ॥ सर्वभूतहितार्थाय कुर्यात्तस्मात्स
दैव हि ॥ ५६ ॥ यदिदं धारयेद्विद्वान् श्रद्धाभक्तिसमन्वितः ॥ ग्रहास्तं नोपसर्पंति न रो
गा न च राक्षसाः ॥ ५७ ॥ धन्योयन्नास्यः शत्रुघ्नः स्त्वेवायं मुनिसत्तम ॥ पठतां शृण्वतां
चैव ददाति परमां गतिं ॥ ५८ ॥ १५८ ॥ इति श्रीविष्णोत्तरे दाल्भ्यपुलस्त्यसंवादे पु
लस्त्योक्तं विष्णोरपामार्जनस्तोत्रं संपूर्णं ॥ संवत् १९५५ ना ज्येष्टमासे शुक्लपक्षे
पौर्णमासि भृगुवारे लिखितं ॥ शुभं भवतु ॥ ॥ दवे श्रीआनंदराम शिवराम मे
रा लखितं ॥ ॥ श्रीविजयते ॥ ॥ ॥ श्री ॥ श्री ॥ ॥